श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## षट्चत्वारिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## षट्चत्वारिंशः सर्गः

*रावणस्य पञ्चसेनापतीनां वधः*

हतान् मन्त्रिसुतान् बुद्ध्वा वानरेण महात्मना।
रावणः संवृताकारश्चकार मतिमुत्तमाम्॥ ५.४६.१ ॥

स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम्।
प्रघसं भारकर्णं च पञ्च सेनाग्रनायकान्॥ ५.४६.२ ॥

सन्दिदेश दशग्रीवो वीरान् नयविशारदान्।
हनूमद्ग्रहणेऽव्यग्रान् वायुवेगसमान् युधि॥ ५.४६.३ ॥

यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः।
सवाजिरथमातङ्गाः स कपिः शास्यतामिति॥ ५.४६.४ ॥

यत्तैश्च खलु भाव्यं स्यात् तमासाद्य वनालयम्।
कर्म चापि समाधेयं देशकालाविरोधितम्॥ ५.४६.५ ॥

न ह्यहं तं कपिं मन्ये कर्मणा प्रति तर्कयन्।
सर्वथा तन्महद् भूतं महाबलपरिग्रहम्॥ ५.४६.६ ॥

वानरोऽयमिति ज्ञात्वा नहि शुद्ध्यति मे मनः।
नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा॥ ५.४६.७ ॥

भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात्।
सनागयक्षगन्धर्वदेवासुरमहर्षयः॥ ५.४६.८ ॥

युष्माभिः प्रहितैः सर्वैर्मया सह विनिर्जिताः।
तैरवश्यं विधातव्यं व्यलीकं किञ्चिदेव नः॥ ५.४६.९ ॥

तदेव नात्र सन्देहः प्रसह्य परिगृह्यताम्।
यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः॥ ५.४६.१० ॥

सवाजिरथमातङ्गाः स कपिः शास्यतामिति।
नावमान्यो भवद्भिश्च कपिर्धीरपराक्रमः॥ ५.४६.११ ॥

दृष्टा हि हरयः पूर्वे मया विपुलविक्रमाः।
वाली च सह सुग्रीवो जाम्बवांश्च महाबलः॥ ५.४६.१२ ॥

नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः।
नैव तेषां गतिर्भीमा न तेजो न पराक्रमः॥ ५.४६.१३ ॥

न मतिर्न बलोत्साहो न रूपपरिकल्पनम्।
महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम्॥ ५.४६.१४ ॥

प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः।
कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः॥ ५.४६.१५ ॥

भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे।
तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे॥ ५.४६.१६ ॥

आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला।
ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः॥ ५.४६.१७ ॥

समुत्पेतुर्महावेगा हुताशसमतेजसः।
रथैश्च मत्तैर्नागैश्च वाजिभिश्च महाजवैः॥ ५.४६.१८ ॥

शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपहिता बलैः।
ततस्तु ददृशुर्वीरा दीप्यमानं महाकपिम्॥ ५.४६.१९ ॥

रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम्।
तोरणस्थं महावेगं महासत्त्वं महाबलम्॥ ५.४६.२० ॥

महामतिं महोत्साहं महाकायं महाभुजम्।
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः॥ ५.४६.२१ ॥

तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः।
तस्य पञ्चायसास्तीक्ष्णाः सिताः पीतमुखाः शराः।
शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः॥ ५.४६.२२ ॥

स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः।
उत्पपात नदन् व्योम्नि दिशो दश विनादयन्॥ ५.४६.२३ ॥

ततस्तु दुर्धरो वीरः सरथः सज्जकार्मुकः।
किरन् शरशतैर्नैकैरभिपेदे महाबलः॥ ५.४६.२४ ॥

स कपिर्वारयामास तं व्योम्नि शरवर्षिणम्।
वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः॥ ५.४६.२५ ॥

अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः।
चकार निनदं भूयो व्यवर्धत च वीर्यवान्॥ ५.४६.२६ ॥

स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः।
निपपात महावेगो विद्युद्राशिर्गिराविव॥ ५.४६.२७ ॥

ततः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम्।
विहाय न्यपतद् भूमौ दुर्धरस्त्यक्तजीवितः॥ ५.४६.२८ ॥

तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि।
तौ जातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ॥ ५.४६.२९ ॥

स ताभ्यां सहसोत्प्लुत्य विष्ठितो विमलेऽम्बरे।
मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः॥ ५.४६.३० ॥

तयोर्वेगवतोर्वेगं निहत्य स महाबलः।
निपपात पुनर्भूमौ सुपर्ण इव वेगितः॥ ५.४६.३१ ॥

स सालवृक्षमासाद्य समुत्पाट्य च वानरः।
तावुभौ राक्षसौ वीरौ जघान पवनात्मजः॥ ५.४६.३२ ॥

ततस्तांस्त्रीन् हताञ्ज्ञात्वा वानरेण तरस्विना।
अभिपेदे महावेगः प्रसह्य प्रघसो बली॥ ५.४६.३३ ॥

भासकर्णश्च सङ्क्रुद्धः शूलमादाय वीर्यवान्।
एकतः कपिशार्दूलं यशस्विनमवस्थितौ॥ ५.४६.३४ ॥

पट्टिशेन शिताग्रेण प्रघसः प्रत्यपोथयत्।
भासकर्णश्च शूलेन राक्षसः कपिकुञ्जरम्॥ ५.४६.३५ ॥

स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः।
अभवद् वानरः क्रुद्धो बालसूर्यसमप्रभः॥ ५.४६.३६ ॥

समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम्।
जघान हनुमान् वीरो राक्षसौ कपिकुञ्जरः।
गिरिशृङ्गसुनिष्पिष्टौ तिलशस्तौ बभूवतुः॥ ५.४६.३७ ॥

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु।
बलं तदवशेषं च नाशयामास वानरः॥ ५.४६.३८ ॥

अश्वैरश्वान् गजैर्नागान् योधैर्योधान् रथै रथान्।
स कपिर्नाशयामास सहस्राक्ष इवासुरान्॥ ५.४६.३९ ॥

हयैर्नागैस्तुरङ्गैश्च भग्नाक्षैश्च महारथैः।
हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः॥ ५.४६.४० ॥

ततः कपिस्तान् ध्वजिनीपतीन् रणे
　निहत्य वीरान् सबलान् सवाहनान्।
तथैव वीरः परिगृह्य तोरणं
　कृतक्षणः काल इव प्रजाक्षये॥ ५.४६.४१ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः॥

www.prapatti.com